# അധ്യാപകരോട് ഒരു വാക്ക്...

ഒന്നാം ക്ലാസ്സിൽ സംസ്കൃതപഠനം ഏതുവരെ എന്നൊരു ചോദ്യം സ്വാഭാവികമായും അധ്യാപകരുടെ മനസ്സിൽ ഉയർന്നു വരാനിടയു്. അതേക്കുറിച്ച് ഒരു ധാരണയില്ലാതെ സംസ്കൃതം പഠിപ്പിക്കാൻ തുടങ്ങിയാൽ വിപരീത അനുഭവമാകും ഉാകുക. അതിനാൽ സംസ്കൃതം പഠിപ്പിക്കാൻ പോകും മുമ്പ് അധ്യാപകർ ഈ ആമുഖക്കുറിപ്പ് സശ്രദ്ധം വായിക്കണമെന്ന് അഭ്യർത്ഥിക്കുന്നു.

ഒന്നാം ക്ലാസ്സിൽ സംസ്കൃതം പഠിക്കുന്നതിന്റെ ആത്യന്തികമായ ലക്ഷ്യം സംസ്കൃതഭാഷയുടെ മധുരവും ലാളിത്യവും സൗന്ദര്യവും കുട്ടികൾക്ക് അനുഭവവേദ്യമാകുകയും അതുവഴി സംസ്കൃതത്തോട് ആഭിമുഖ്യം വളരുകയും ചെയ്യുക എന്നുള്ളതാണ്. അല്ലാതെ സംസ്കൃതത്തിൽ ആഴത്തിലുള്ള ഒരു പഠനം ഒന്നാം ക്ലാസ്സിൽ ഉദ്ദേശിച്ചിട്ടില്ല. ലക്ഷ്യം നേടുന്നതിനായി ചുവടെ കൊടുത്തിട്ടുള്ള മാർഗങ്ങൾ അവലംബിക്കാനാണ് നിർദ്ദേശിക്കപ്പെട്ടിട്ടുള്ളത്.

- സംസ്കൃതത്തിന് മാതൃഭാഷയുമായുള്ള അഭേദ്യമായ ബന്ധം കുട്ടിക്കു മനസ്സിലാക്കിക്കൊടുക്കുക. അതിനായി മാതൃഭാഷയിൽ കുട്ടിക്കു പരിചിതമായ സംസ്കൃതപദങ്ങൾ ആദ്യം ആദ്യം പരിചയപ്പെടുത്തുക.
- സരളമായ സംസ്കൃതഗീതങ്ങളുടെയും സുഭാഷിതങ്ങളുടെയും സാരോപദേശകഥകളുടെയും ആസ്വാദ്യതയും അവ ഉൾക്കൊള്ളുന്ന സന്ദേശവും മൂല്യങ്ങളും കുട്ടിക്കു പകർന്നു നൽകുക.

ഒന്നാം ക്ലാസ്സിൽ പഠനം പൂർത്തിയാക്കുന്ന കുട്ടിക്ക് സംസ്കൃതത്തിൽ താഴെ പറയുന്ന പ്രാപ്തികൾ ഉാകണമെന്നാണ് കരിക്കുലം വിഭാവനം ചെയ്യുന്നത്.

- മാതൃഭാഷയിൽ പ്രചുരപ്രചാരം നേടിയിട്ടുള്ളതും കുട്ടികൾക്ക് പരിചിതങ്ങളുമായ സംസ്കൃതപദങ്ങൾ തിരിച്ചറിയുക. അതായത് കുട്ടിക്ക് മാതൃഭാഷയിൽ പരിചിതങ്ങളായ പദങ്ങളധികവും സംസ്കൃതമാണെന്ന തിരിച്ചറിവുാകുക.
- മറ്റു ഭാഷകളിലുള്ളതുപോലെ സംസ്കൃതത്തിലും ആസ്വാദ്യങ്ങളായ അഭിനയ ഗീതങ്ങളും, പാട്ടുകളും, കഥകളും സുഭാഷിതങ്ങളുമൊക്കെയുന്ന് മനസ്സിലാക്കുക.

- ഒന്നു മുതൽ 10 വരെ സംസ്കൃതത്തിൽ എണ്ണാനും സംഖ്യാകേളികളിൽ സോത്സാഹം പങ്കെടുക്കാനും കഴിയുക.
- ക്ലാസ്സിലും വെളിയിലും കളിസ്ഥലത്തും അധ്യാപകൻ സംസ്കൃതത്തിൽ നൽകുന്ന സാമാന്യനിർദ്ദേശങ്ങൾ മനസ്സിലാക്കി പ്രവർത്തിക്കാൻ കഴിയുക.
- സംസ്കൃതത്തിലുള്ള ലളിതമായ ഭാഷാക്രീഡകളിലും സംഖ്യാകേളികളിലും താത്പര്യപൂർവം പങ്കെടുക്കാൻ കഴിയുക.
- പരിചിതങ്ങളായ സംസ്കൃതപദങ്ങളെയും പദങ്ങളിൽ അക്ഷരങ്ങളെയും തിരിച്ചറിഞ്ഞ് വായിക്കാനും എഴുതാനും കഴിയുക.
- ചിത്രങ്ങൾ നിരീക്ഷിച്ച് ജീവികളുടെയും പൂക്കളുടെയും ഫലങ്ങളുടെയും സംസ്കൃതനാമങ്ങൾ പറയാൻ കഴിയുക.
- ലളിതമായ സംസ്കൃതഗീതങ്ങളും സുഭാഷിതങ്ങളും ഒറ്റയ്ക്കും കൂട്ടായും ഈണത്തിൽ ചൊല്ലാൻ കഴിയുക.

മുകളിൽ സൂചിപ്പിച്ച ഭാഷാപ്രാപ്തികൾ കുട്ടിക്കു നേടിക്കൊടുക്കാനുള്ള പ്രവർത്തനങ്ങളാണ് അധ്യാപകർ ക്ലാസ്സിൽ നടത്തേത്. സംസ്കൃതത്തോട് കുട്ടിക്കുള്ള ആഭിമുഖ്യം വളർത്തുന്നതിന് അനുകൂലമായ ഒരു സമീപനമാണ് അധ്യാപകർ സ്വീകരിക്കേത്.



## प्रारम्भः

केरलेषु प्रथमं संस्कृतभाषां प्रथमकक्ष्यायां पाठयितुम् आरभ्यते। छात्रैः मातृभाषायाम् उपयुज्यमानानि कानिचन संस्कृतपदानि श्रुतानि स्युः। तथापि भाषारूपेण प्रथमकक्ष्यायामेव छात्राः संस्कृतं शृण्वन्ति। अतः प्रथमसप्ताहे छात्राणां प्रेरणादायिकाः काश्चन सरसक्रीडाः आयोजितव्याः। तदनन्तरं पाठप्रवेशः पर्याप्तः।

संस्कृतभाषायाः महत्वं त्रिचतुरैः वाक्यैः छात्रान् बोधयित्वा क्रीडानिर्देशाः मातृभाषया दातुं शक्यन्ते।

यथा -

**सिद्धताक्रीडा १**

अध्यापकः छात्रान् पृच्छति - सर्वे क्रीडितुम् इच्छन्ति खलु? गीतम् इच्छन्ति खलु? तर्हि, वयमेकं गीतमालपामः।

अधोदत्तस्य गीतस्य एकैकां पङ्क्तिम् अध्यापकः मन्दं स्पष्टं च आलपति। छात्राः अनुगायन्तु। द्वित्रवारं छात्राः आलपन्तु।



### कुक्कुटकूजनम्

को को, को को
कुक्कुटः कूजति।
सूर्यः उदयते
कमलं विकसति।





कू कू, कू कू
कोकिलः कूजति।
पुष्पं विकसति
सुगन्धः प्रसरति।।

आलपने तालात्मकता भवेत्। साभिनयं गीतालपनम् आवश्यकम्।
अग्रिमदिने अपि गीतालपनम् अनुवर्तताम्।
पुनः नूतनीम् एकां क्रीडामारभताम्।
क्रीडानिर्देशाः मातृभाषया भवेयुः।



**सिध्दताक्रीडा - २**

छात्राः, वयमेकां क्रीडां कुर्मः। सर्वे क्रीडाम् इच्छन्ति खलु? तर्हि, श्रद्धया शृण्वन्तु। अहं पञ्च पदानि वदामि। भवन्तः अनुवदन्तु। माम् अनुकुर्वन्तु च। अङ्गविक्षेपपूर्वकम् अभिनयं कृत्वा अध्यापकः वदति - 'उत्तिष्ठन्तु, उपविशन्तु, कूर्दन्तु, हसन्तु, विलपन्तु'। एकैकस्यापि पदस्य उच्चारणं कृत्वा अर्थं च बोधयतु। पदानाम् उच्चारणाय छात्राणां कृते अवसरं ददातु। पर्याप्तमात्रम् अभ्यासं कारयतु। पदानाम् अर्थं पृष्ट्वा, छात्रैः पदार्थाः अवगताः इति निर्णयतु। पुनः अध्यापकः वदति - 'यदा अहम् उत्तिष्ठन्तु इति वदामि, तदा सर्वैः उत्थातव्यम्, उपविशन्तु इति वदामि, तदा उपवेष्टव्यम्, कूर्दन्तु इति वदामि, तदा कूर्दितव्यम्, हसन्तु इति वदामि तदा ह ह ह इति हसितव्यम्, विलपन्तु इति वदामि तदा ङी ङी ङी इति विन्लपनीयम् च। कदाचित् हसन्तु इति उक्त्वा अहं विलापं करोमि, तदा अपि युष्माभिः हसितव्यमेव। अन्यथा करोति चेत्, सः क्रीडातः बहिर्भविष्यति। यावत् एकः अवशिष्यते, तावत् क्रीडा अनुवर्तताम्। शिष्टः विजयी भविष्यति। सः करघोषेण अभिनन्दनीयः।

सूचना - पञ्च पदानां स्थाने पदत्रयं पदचतुष्टयं वा उपयुज्य च क्रीडितुं शक्यते। पञ्चभ्यः अधिकानां पदानां योजनं मास्तु। विभिन्नेषु अवसरेषु विभिन्नानि पदानि उपयुज्य क्रीडनमपि उत्तमं भवति।

**सिध्दताक्रीडा - ३**

मातृभाषायां विद्यमानानि कानिचित् संस्कृतपदानि छात्रैः श्रुतानि, जीवने उपयुज्यमानानि च स्युः। तेषु पदेषु चित्रैः प्रदर्शयितुं योग्यानि पदानि उपयुज्य क्रीडेयं आरम्भणीया। अध्यापकः क्रीडां चालयितुं चितानां पदानां चित्राणि सज्जीकरोतु।

अध्यापकेन, छात्राणां संख्यानुसारं चित्राणि सज्जीकरणीयानि। छात्रान् गणत्रयं, गणचतुष्टयं वा कृत्वा चित्राणि वितरतु। एकस्मै गणाय पञ्च चित्राणि देयानि। पुनः चित्रेषु किं किम् अस्ति इति गणेषु चर्चां कुर्वन्तु छात्राः। अनन्तरं कस्य चित्रम् इति छात्राः वदन्तु। छात्रैः उक्तानि पदानि अध्यापकः मातृभाषायां चार्ट्पत्रे लिखतु पठतु च। अन्ते एकैकेन गणेन कति पदानि प्राप्तानि इति वदतु। प्रवर्तनस्य अस्य उद्देश्यं छात्राणां संस्कृतभाषा नूतनी नास्ति इति बोधनम् एव। अध्यापकेन उद्दिष्टानि सर्वाणि पदानि प्रायशः चित्रद्वारा छात्रैः वक्तुं शक्यानि भवेयुः। अत्र उपयोक्तुं शक्यानि कानिचित् पदानि उदाहरणरूपेण अधः दत्तानि।

| |
|---|
| मुखम्, नखः, कर्षकः, आकाशम्, सूर्यः, चन्द्रः, नक्षत्रम्, चक्रम्, मनुष्यः, पुरुषः, काकः, नीलः, पात्रम्, पुस्तकम्, विमानम्, नदी, सूर्यकान्तिः, सिंहः, राजा, राज्ञी, शिवः, महर्षिः, शूलम्, गदा, अक्षरम्, तुलसी, वीणा, शङ्खः। |

मातृभाषायां छात्रैः परिचितानि इतराणि पदानि च अनेकानि सन्ति। तेषां पदानां स्मारणमपि कर्तुं शक्यते। तादृशानां केषञ्चन पदानां च पट्टिका अत्र दत्ता।

अन्नम्, अनुजः, अध्यापकः, आकाशवाणी, आग्रहः, आपद्, इष्टम्, उत्तरम्, कृषिः, कृष्णः, किरणः, गुरुः, गणितम्, गुणः, ग्रामः, चिन्ता, जन्तुः, जलम्, ज्येष्ठः, दन्तः, दया, दानम्, दिवसः, दिनम्, दीपः, दुःखम्, दूरदर्शनम्, दोषः, देवालयः, नगरम्, नागः, नेत्रम्, पाठः, पायसम्, पिता, पुष्पम्, पुत्रः, पुत्री, पुरुषः, प्रार्थना, प्रधानम्, प्रभाषणम्, प्रसिद्धम्, प्रवेशनम्,फलम्, बलम्, बालः, बुद्धिः, भक्तिः, भर्ता, भाषा, भार्या, भूमिः, मनः, मन्दिरम्, मधुरम्, मङ्गलम्, माता, मूषिकः, रक्तः, रश्मिः, राज्यम्, रात्रिः, वार्ता, वायुः, विद्या, विद्यालयः, विषमम्, विनोदः, विषम्, विद्यार्थी, विचारः, विशेषः, विकारः, विचित्रम्, विवाहः, वृद्धः, शक्तिः, शब्दः, शिशुः, शुभम्, सस्यम्, सहोदरः, सहोदरी, सर्पः, स्वर्गः,सत्यम्, सैनिकः, सुखम्, क्षमा, क्षयः ,क्षामः, क्षीणः, ....।

# सिद्धताक्रीडा ४

**सतालम् आलपतु, क्रीडतु।**

यानं यानं रेल्यानम्
कू कू कू कू रेल्यानम्।
सुखदं यानं रेल्यानम्
कट कट गच्छति रेल्यानम्।
अतति च वेगं रेल्यानम्
यानं यानं रेल्यानम्।



# मम गृहम्

## आमुखम्

प्रथमकक्ष्यायाः प्रथमपाठोऽयम्। नूतनभाषां प्रति सुगमप्रवेशाय स्वपरिवारस्य परिचायकानि छात्राणां परिचितानि च पदानि एव अस्मिन् पाठे उपयुक्तानि। सम्भाषणेन परस्परपरिचयः, संस्कृतभाषाप्रवेशः मकारस्य परिचयः, मातृस्नेहः, पितृस्नेहः, गुरुस्नेहः च अस्माभिः कर्तव्यः इति बोधनं च अनेन पाठेन उद्दिष्टम्। अत्र साक्षात् अक्षरलेखनं न उद्दिष्टम्। बिन्दूनां योजनेन अक्षरलेखनम्, वर्णलेपनेन अक्षरपरिचयः च उद्दिष्टः। छात्रैः अनायासेन लेखितुं शक्यम् एकम् अक्षरमेव पाठेऽस्मिन् लेखनाय निर्दिष्टम्।

**पाठनाम** - **मम गृहम्**

**कालांशः** - १६

**उद्देश्यम्** - संस्कृतभाषापरिचयः। माता पिता गुरुश्च आदरणीयाः इति बोधः।

**नैपुणीः** - संस्कृतेन परस्परपरिचयः।

| आशयाः / धारणाः / व्यवहाररूपाणि | पठनप्रवर्तनानि / पठनतन्त्राणि | पठनाधिगमाः |
|---|---|---|
| संस्कृतेन परस्परपरिचयः<br>मातापितरौ गुरवश्च वन्दनीयाः।<br>प्रश्नवाचकशब्दानां परिचयः।<br>संस्कृतं व्यवहारयोग्या भाषा।<br>बन्धुवाचकशब्दपरिज्ञानम्<br>पदानाम् उच्चारणम्<br>सम्भाषणपरिचयः<br>'म' इति अक्षरम्<br>'मम' इति पदम्<br>लघुवाक्यानि। | लघुवाक्यानि पठति।<br>निरीक्षणम् ।<br>वर्गीकरणम् ।<br>निगमनम् ।<br>अक्षरलेखन-परिचयाय तन्त्रांशः ( Software)।<br>उबुण्डु (ubuntu) मध्ये जिम्प् ( Gimp) तन्त्रांशे (software) अक्षरलेखनस्य चलितचित्रं ( Animation) निर्माय प्रदशनम्। | लघुवाक्यानि परिचिनोति ।<br>चित्राणि दृष्ट्वा पदानि वदति ।<br>अक्षरस्वरूपं जानाति ।<br>श्रवणेन पदानि वाक्यानि च पठति।<br>(graphic reading)<br>पदेषु मकारं प्रत्यभिजानाति । |

## प्रवर्तनम् - १

## चित्रवाचनम्

**उद्देश्यम् -** संस्कृतभाषा श्रवणाय तात्पर्यम्।

अध्यापकः कक्ष्यां प्रविश्य पृच्छति- ' छात्राः! नूतनमित्राणि इष्टाणि अभवन् वा' ? छात्राणां कृते उत्तरकथनाय अवसरः देयः।

स्वगृहे इष्टतमः कः ? इति अध्यापकः छात्रान् पृच्छति। छात्राः माता, पिता, ज्येष्ठः इत्यादीनि उत्तराणि वदेयुः। यथेष्टं छात्राः वदन्तु। पाठपुस्तकस्थं सुजातायाः चित्रं प्रदर्श्य 'एतां भवन्तः जानान्ति वा' इति पृच्छति। पश्यतु, सा स्वयमेव परिचाययति 'मम नाम सुजाता' इति। वयं सुजातायाः गृहं परिचिनुमः। सुजाता स्वगृहम्, बन्धुजनान् च एवं परिचाययति। अध्यापकः पठति।

'मम माता' - सर्वे छात्राः अनुवदन्तु।
'मम गृहम्' - सर्वे छात्राः अनुवदन्तु।
'मम पिता' - सर्वे छात्राः अनुवदन्तु।
'मम सोदरः' - सर्वे छात्राः अनुवदन्तु।
'मम मार्जारः' - सर्वे छात्राः अनुवदन्तु।

पाठपुस्तके विद्यमानानि चित्राणि उपयुज्य चित्रवाचनस्य अवसरः कल्पनीयः।

**मूल्यनिर्णयसूचिकाः -**

चित्रं दृष्ट्वा सम्यक् पठति।

## प्रवर्तनम् - २

## गीतस्य आलपनम्

**उद्देश्यम् -** संस्कृतगीतश्रवणे तात्पर्यम्।

सुजातायाः इष्टान् अधिकृत्य एकं गीतं श्रुणुमः -

सूचना - गीतस्य आलपनात्पूर्वं गीतं चार्ट्पत्रे विलिख्य कक्ष्यायां स्थापयतु। 'मम' इति पदम् एकेनैव वर्णेन लिखतु। अन्यानि पदानि भिन्नवर्णेन लिखतु।

**मम देशो भारतम्**

**मम भाषा संस्कृतम्।**

**मम माता मालती**

**मम जनको माधवः।**

भारतम् अस्माकं जन्मदेशः भवति। माता अस्माकं जन्मदात्री भवति। पिता अस्माकं जन्मदाता च भवति। गुरुः अस्माकं ज्ञानदाता भवति। कुतः भवन्तः मातरि अधिकं स्निह्यन्ति? वदन्तु। एकैकः छात्रः एकैकं कारणं वदतु। पश्यन्तु बालाः एवमेव मातापिता, गुरुः च अस्माकं कृते बहूनि कार्याणि कुर्वन्ति। तस्मात् ते अस्माभिः सदा आदरणीयाः। अतः एव ज्ञानिनः वदन्ति - 'माता पिता गुरुः दैवम्', 'मातृदेवो भव, पितृदेवो भव, आचार्यदेवो भव, अतिथिदेवो भव' इति।

चार्ट्पत्रे समानवर्णेन लिखितानि पदानि पश्यन्तु। तानि एकमेव वा भिन्नानि वा? एकमेव खलु? किं तत् पदम्? मम इति खलु? अध्यापकः बिन्दुभिः रेखाद्वयेन निर्मितं 'मम' इति पदं छात्राणां कृते चार्ट्पत्रे लिखित्वा ददाति। अध्यापकः मकारस्य लेखनविधिं प्रदर्शयतु। छात्राः तद्दृष्ट्वा बिन्दून् योजयित्वा मकारं लिखन्तु। पुनः वर्णयोजनमपि कुर्वन्तु।

**मूल्यनिर्णयसूचिकाः -**

सतालम् आलपति।

## प्रवर्तनम् -३

## अक्षरप्रत्यभिज्ञानम्

**उद्देश्यम्** - म- इति अक्षरप्रत्यभिज्ञानम्।

अध्यापकः मकारयुक्तानि पदानि चिटिकासु लिखित्वा छात्रेभ्यः वितरति। एकस्य छात्रस्य हस्ते पदद्वयं दातव्यम्। छात्राः मकारं प्रत्यभिज्ञाय तं वर्णलेखन्या वलयीकरोतु। छात्रैः सम्यक् अङ्कनं कृतं वा इति पश्यतु।

**मूल्यनिर्णयसूचिकाः -**

सम्यक् अङ्कनं कृतम्

सम्यक् उच्चरितम्।

## प्रवर्तनम् - ४

## मकारयुक्तपदानां वर्गीकरणम्।

**उद्देश्यम्-** मकारज्ञानम्।

अध्यापकः मकारयुक्तानि, मकाररहितानि च पदानि मेलयित्वा पेटिकायां स्थापयति। छात्राः एकैकः पेटिकातः मकारयुक्तं पदत्रयं चिनोतु। छात्रैः चितानि पदानि कानि इति अध्यापकः पृच्छतु। तेषु पदेषु मकारः अस्ति वा इति छात्रान् पृच्छतु।

छात्रेण पदानि सम्यक् चितानि चेत् अनुमोदयतु।

यथा -

मकारयुक्तानि पदानि - मनः, माता, अमला, माला, मधुरम्, समम्, सोमः, मयूरः, कमलम्, मम, मकरः, मन्त्री, मन्दिरम्, मनुष्यः, मक्षिका, मरीचिका, चामरम्, पामरः, ग्रामः....।

मकाररहितानि पदानि - पिता, सर्पः, राजा, गायकः, दीपः, नदी, वृक्षः, आसन्दः, चषकः, विद्यालयः...........।

**मूल्यनिर्णयसूचिकाः -**

पदत्रयमपि सम्यक् चितम्।

सम्यक् उच्चारणं कृतम्।

# अनुबन्धप्रवर्तनानि

## प्रवर्तनम् - १

## नामस्मरणक्रीडा

**उद्देश्यम् -** संस्कृतभाषायाः अध्ययने तात्पर्यम्।

अध्यापकः स्वनाम संस्कृतेन उक्त्वा परिचायनं करोतु। तदनन्तरं छात्रान् मण्डलाकारेण उपावेश्य सर्वेषां छात्राणां नाम पृच्छतु। अनन्तरं अध्यापकः एवं वदतु - 'वयम् एकां क्रीडां कुर्मः, प्रथमम् अहं मम नाम वदामि, तदनन्तरम् अहं प्रथमस्थाने उपविष्टं बालं प्रति नाम पृच्छामि, तदा सः प्रथमम् अध्यापकस्य नाम, तदनन्तरं स्वनाम च वदेत्। द्वितीयः बालः अध्यापकस्य नाम ततः प्रथमबालकस्य नाम, अनन्तरं स्वस्य च नाम वदेत्। एतेन क्रमेण सर्वेऽपि छात्राः स्वस्वपरिचायनं कुर्वन्तु। यदा कश्चित् बालः कस्यचित् नाम स्मर्तुं न शक्नोति, तदा सः तं बालकं प्रति तव नाम किमिति पृच्छतु। अत्र अध्यापकेन 'तव नाम किम् इति प्रष्टव्यम् इति सूचनीयम्। एवं सर्वेऽपि छात्राः सर्वेषां नामानि ज्ञातुं, स्मर्तुं च शक्नुयुः।

अभ्यासार्थं छात्रान् पङ्क्तिद्वयं कृत्वा परस्परम् अभिमुखीकृत्य स्थापयतु। मम नाम, तव नाम इत्यनयोः अभ्यासः करणीयः। एकस्यां पङ्क्तौ स्थितः एकः,तस्य अभिमुखं स्थितं बालकं प्रति 'तव नाम किम्' इति पृच्छतु। द्वितीयपङ्क्तौ विद्यमानः स्वपरिचायनं कृत्वा तव नाम किम् इति पृच्छतु। अपेक्षितं साहाय्यम् अध्यापकः करोतु। (सर्वैः छात्रैः एतत् अनुवर्तनीयम्।)

**मूल्यनिर्णयसूचिकाः -**

सर्वेः, मम, तव, किम् - इति पदानि सम्यक् प्रयुक्तानि।

**प्रवर्तनम् - २**

(क) गृहसम्बन्धिनीनां बालकवितानां श्रवणाय अवसराः कल्पनीयाः।

(१) अहं प्रभाते उत्तिष्ठामि
मातापितरौ प्रणमामि ।
........................
(संस्कृतभारती - शिशुसंस्कृतम्, ध्वनिमुद्रिका)

(२) उदयात् पूर्वमुत्थानम्
शुद्धवस्त्रस्य धारणम्।
....................
गेयसंस्कृतम् - सान्द्रमुद्रिका (DPI, 2009)
Download - www.sanskritkerala.gov.in)

(ख) अक्षरलेखनपरिचयाय तन्त्रांशः (Software) राष्ट्रीयसंस्कृविद्यापीठम्, तिरुपति

(ग) उबुण्डु (ubuntu) मध्ये जिम्प (Gimp) तन्त्रांशे (software) अक्षरलेखनस्य चलितचित्रं (Animation) निर्माय प्रदर्शयतु।

(घ) पठनं सुकरं रसकरं च कर्तुं केचन उपायाः अनुबन्धे दत्ताः। अस्मिन् पाठभागे सुजातां तस्याः बन्धुजनान् च परिचाययितुम् अङ्गुलीपाञ्चालिकानां (finger puppet) उपयोगं कर्तुं शक्यते। (**अनुबन्धः - १**)

(च) छात्राणां बहुमुखप्रतिभायाः विकासाय कलादिषु अभिरुचिः अपि वर्धनीया। अत्र अग्निपेटिकाः उपयुज्य गृहनिर्माणप्रवर्तनम् कर्तुं शक्यते। (**अनुबन्धः - २**)

(छ) अक्षरचित्ररचना- अस्मिन् पाठे मकारेण गृहस्य चित्रं निर्मातुं शक्यते। (**अनुबन्धः - ३**)

| **पाठयोजना** | **प्रथमा कक्ष्या** |
|---|---|

| | | |
|---|---|---|
| **पाठस्य नाम** | : | मम गृहम्। |
| **दिनाङ्कः** | : | ................ |
| **समयः** | : | १६ कालांशाः। |
| **पठनाधिगमः** | : | लघुवाक्यानि परिचिनोति ।<br>चित्राणि दृष्ट्वा पदानि वदति ।<br>अक्षरस्वरूपं जानाति ।<br>श्रवणेन पदानि वाक्यानि च पठति।<br>(graphic reading)<br>पदेषु मकारं प्रत्यभिजानाति । |
| **आशयः** | : | संस्कृतं व्यवहारयोग्या भाषा। |
| **सामर्थ्यानि / नैपुणी** | : | संस्कृतेन परस्परपरिचयः। |
| **भाषापराणि नैपुण्यानि** | : | 'म' इति अक्षरम्, 'मम' इति पदम्, लघुवाक्यानि। |
| **व्यवहाररूपाणि** | : | संभाषणम्, लघुवाक्यानि। |
| **मूल्यानि मनोभावश्च** | : | मातापितरौ गरुश्च वन्दनीयाः। |
| **पठनसामग्र्यः** | : | वर्णलेखनी, वर्णकागदानि। |
| **प्रतीक्षितोत्पन्नानि** | : | वर्णेन लिप्तं 'म' इत्यक्षरम्। |

| प्रक्रियापुटम् | मूल्यनिर्णयपुटम् |
| --- | --- |
| (पठनप्रवर्तनानां सम्पूर्णं विवरणम् अत्र दातव्यम्)<br>बिन्दूनां योजनेन अक्षरलेखनम्, अक्षरे वर्णलेपनम्<br>(अध्यापकः मकारयुक्तानि पदानि चिटिकासु लिखित्वा छात्रेभ्यः वितरति। एकस्य छात्रस्य कृते पदद्वयं दातव्यम्। छात्राः मकारं प्रत्यभिज्ञाय मकारं वर्णलेखन्या वलयीकरोतु। छात्रैः सम्यक् अङ्कनं कृतं वा इति पश्यतु। प्रवर्तनम्-३)<br>चित्रं दृष्ट्वा पदं, वाक्यं च पठति।<br>(अध्यापकः मकारयुक्तानि, मकाररहितानि च पदानि मेलयित्वा पेटिकायां स्थापयति। छात्राः एकैको भूत्वा पेटिकातः मकारयुक्तं पदत्रयं चिन्वन्तु। छात्रैः चितानि पदानि कानि इति उच्चैः पृच्छतु। तेषु पदेषु मकारः अस्ति वा इति छात्राः विवेचयन्तु। प्रवर्तनम्-४)<br>नामपरिचायनम् (नामस्मरणक्रीडा)<br>(नामस्मरणक्रीडायाः प्रक्रिया अत्र पूर्णतः लेखनीया। अनुबन्धप्रवर्तनम् - १) | (मूल्यनिर्णयस्य सम्पूर्णं विवरणम् अत्र दातव्यम्) |

**प्रधानाध्यापकहस्ताक्षरम्** **अध्यापकहस्ताक्षरम्**